**उपसंहारग्रन्थ:**

एवं श्रीस्वामिनारायणसम्प्रदाये सुधासिन्धुप्रदर्शिता: श्रेष्ठसिद्धान्ता:- परब्रह्मश्रीस्वामिनाराणपरमात्मा स्वरूपसन्नेवैकतत्त्वात्मक आनन्दघन: साकारमूर्ति:। स चैकदेशस्थोऽप्यक्षरब्रह्मात्मकस्वरुपसत्स्वतेज:प्रकाशात्मकाऽक्षरधामद्वारा सर्वत्र केवलान्वयिव्यापक: ।भगवन्मूर्ते: प्रकाशोऽक्षरब्रह्मस्वरूपसत्साकारं पुरुषाकारं सेवकं ,धामस्वरूपं च सर्वत्रान्वयि व्यापकं ब्रहमलोकात्मकं , अन्तर्यामिकार्यकरं साक्षितया वर्तमानं च ।

आविर्भूतचेतनचैतन्यस्वरुपसन्मूर्तयो मुक्ता: पुरुषोत्तमसमाकृतय: । ऐश्वर्यात्मान ईश्वरा ऐश्वर्यात्मकसामर्थ्यसामर्थ्याश्रया: स्वरुपसन्मूर्तय: मायिकसात्त्विकप्रधानविग्रहवन्तो जगदधिदेवा: । ज्ञानघना: सच्चिदानन्दा जीवात्मानोऽणुप्रकाशा: साक्ष्यनुस्वरुपा: । परब्रह्मस्वयंस्वरुपसन्नवताराऽवतारात्मकमूर्ति:। अंशकलाऽऽवेशप्रभृतयो वेशान्तरा: सत्तया वा तथाभिधाना: । स्वरूपमात्रनित्यतृप्ति: । अन्ययोगोत्था त्वनित्या सा । "अहं तव भक्त:" इत्युपासना । धर्मज्ञानवैराग्यभक्तिभिर्मोक्षप्राप्ति:। अक्षरब्रह्मणि सर्वात्मना सारुप्यमुक्ति: सुसेवान्वितामुख्या । अक्षरधामस्थश्रीहरेरायुधाऽऽभूषणवेषोपकरणचिह्नगुणादय: सर्वेऽपि चेतना मुक्ता वेशान्तरानन्दभोक्तार एव, उद्यानवाहनसमृद्धयोऽपि मुक्ता एव । पञ्चतत्त्वानि मुख्यानि जीवेश्वरमायाब्रह्मपरब्रह्माणीति । मायिककर्माणि भगवद्वियोगो वा संसार: ।आज्ञांकिताऽऽवर्तनादीनि । माया नित्या त्रिगुणा । भगवच्छरणागति: । संत आचार्या द्वाराणि । अतिवाहिकाऽर्चिर्मार्ग:। एकाऽनेकस्वरूपसामर्थ्यानि । सर्वनियामकत्त्वमेकं परमेश्वरे विशिष्टम्।

परब्रह्मणोऽक्षरब्रह्मणो मुक्तानां च अत्रवत् नित्यविभूत्यात्त्मकविग्रहवत्त्वम् , तेषु शरीरेषु नित्त्यनवास इति न श्रीस्वामिनारायणभगवत्सिद्धान्त:। अक्षरधाम्नि केवलपुरुषोत्तमसारुप्यमुक्ता: किशोरा दिव्या द्विभुजा: । अक्षरधाम्नि द्विचरणारविन्दोपासना। गोलोकवैकुण्ठादौ चतुश्चरणारविन्दोपासनेति पुराणप्रसिद्धि:। गोलोकवैकुण्ठादौ स्वरुपस्य आत्मन: स्वरुपस्य देहस्य च भेदोप्यभेद इव । विष्णोरवताराणामपि तत्तद्दिव्यविभूतिदेहस्य लीलाविभूतिदेहस्य वाऽपेक्षा वर्तते यत्त्यागेनात्र निश्चियते वर्ण्यते च तथैव पुराणै:। आश्चर्यरुपा माया सर्वजडतत्त्वकारणम् । इत्येवं पृथक्तया सुधासिन्धुप्रबन्धे स्पष्टं प्रतिपादितम् तत्सर्वमुपनिषद्दृष्ट्या समीचीनतमम् । यद्यपि नाऽपेक्षा परावाण्यां प्रमाणादीनां तथापि लौकिकरीत्या यथामतिकृतप्रयासोऽहमत्रैव तिष्ठामि ।

## "अखण्डितार्षमर्यादाय नम:"